# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – साहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – किरातार्जुनीयम् | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।**

१ स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥
२ कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥
३ असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपादया ।
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परम् ॥

**प्रश्नः २ ग्रन्थकर्तुः परिचयं लिखत ।**

**प्रश्नः ३ किरातार्जुनीयस्य प्रथमसर्गस्य सारांशं लिखत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः सन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ अनारतं तेन पदेषु लम्भिताः विभज्य सम्पद्वनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः ॥
२ उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षय ।
स्वयं पदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥
३ इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥

**प्रश्नः ५ अहो दुरन्ता बलवद्विरोधिता इति सूक्तिः विवेच्यताम् ।**

**प्रश्नः ६ किरातार्जुनीयस्य महाकाव्यत्वं प्रतिपादयत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः सन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजा नराधिपः ।
परैस्त्वदन्यः कहवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥

२ वनान्तशय्या कठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥

३ विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि विधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥

**प्रश्नः ८ वनेचरस्य उक्तीः प्रतिपादयत ।**

**प्रश्नः ९ द्रौपद्याः वचनानि यथाग्रन्थं लिखत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ ग्रन्थकर्तुः नाम किम् ?
२ किरातार्जुनीयं महाकाव्यं खण्डकाव्यं वा ?
३ 'कृतप्रणामस्य' अत्र कः समासः ?
४ विविधमतनिष्कर्षैः भारवेः समयः कदा निर्धार्यते ?
५ किरातार्जुनीयस्य कथास्रोतः कुत्र प्राप्यते ?
६ किरातार्जुनीये महाकाव्ये कति सर्गाः सन्ति ?
७ किरातार्जुनीयस्य महाकाव्यस्य को नायकोऽस्ति ?
८ अस्मिन् ग्रन्थे कः प्रधानरसोऽस्ति ?
९ किरातार्जुनीये प्रधाना नायिका का वर्तते ?
१० वर्णलिङ्गी वनेचरः कुत्र ययौ ?
११ वृकोदरः कस्य नाम ?
१२ प्रथमसर्गे कति पद्यानि सन्ति ?
१३ किरातार्जुनीयस्य प्रथमसर्गे कस्य छन्दसः प्रयोगोऽस्ति ?
१४ 'स्वधर्मः' अत्र कः समासः ?
१५ भारवेः काव्यं कस्मिन् अर्थे प्रसिद्धम् ?

****